**R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र ६ वे**

**विषयः कादम्बरी–कथामुख** (19R462)

**दिनांक : २१/०६/२०२२** **गुण : ६०** **वेळ : स. १०.०० ते दु. १२.३०**

**सूचना : सर्व प्रश्न अनिवार्य**

**प्र.१. त्रयाणांमनुवादं मातृभाषया ।** **(१८)**

१) देव, द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपातिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्चरस्थं शुकमादाय देवं विज्ञापयति 'सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवः। विहङ्गमाश्चयमाश्चर्यभूतोनिखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायगताहमिच्छमि देवदर्शनसुखनुभवितुम्' इति। एतदाकर्ण्य 'देवः प्रमाणम्' इत्युक्त्वा विरराम। उपाजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि 'को दोषः, प्रवेश्यताम्' इत्यादिदेश।

२) स तस्यामवजिताशेषमुवनमण्डलतया विगतराज्यचिन्ताभारनिर्वृतः, द्विपान्तरागतानेकभूमिपालमौलिमाला–लालितचरणयुगलो, वलयमिव लीलया भुजेन भुवनारमुद्वहन् अमरगुरुमपि प्रज्ञयोपसहद्भिरनेककुलक्रमा–गतैरसकृदालोचित नीतिशास्त्रनिर्मलमनोभिरलुब्धेः स्निग्धैःप्रबुद्धैश्चामात्यैः परिवृतः, केसरिकिसोरकैरिव विक्रमैकरसैरपि विजयव्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास।

३) एकदा तु नातिदूरोदिते नवनलिनदलसंपुटाभिदि किंचिन्मुक्तपाटलिम्नि भगवति सहस्त्रमरीचिमालिनि राजानमास्थनमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वलम्बिना कौक्षेयकेण संनिहितविषधरेव चन्दनलता भीषणरमणीयकृतिः, चूडामणिप्रतिबिम्बच्छलेन राज्ञाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्याना क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्।

४) यस्मिंश्च राजनि जितजगतिपालयति महीं चित्रकर्मसु वर्णसंकराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः शास्त्रेषु चिन्ता, स्वप्नेषु विप्रलम्भाः छत्रेषु कनकदण्डाः ध्वजेषु प्रकम्पाः गीतेषु रागविलासितानि, करिषु मदविकाराः, चापेषु गुणच्छेदाः गवाक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलङ्काः, रतिकलहेषु दूतप्रेषणानि सार्यक्षेषु शून्यगृहाः न प्रजानामासन्। यस्य च परलोकाद्भयम्, अन्तःपुरकाकुन्तलेषु भङ्गः, नूपुरेषु मुखरता, विवाहेषु करग्रहणम् अनवरतमखाग्निधूमेनाश्रुपातः, तुरङ्गेषु कशाभिघातः मकरध्वजे चापध्वनिरभूत।

**प्र.२. ससन्दर्भं स्पष्टीकरणं कुरुत। (केवलं चत्वारः)** **(२४)**

१) अनुकरोति भगवतो नारायणस्य।

२) कथामिव अक्लिष्टता लावण्यस्य।

३) कुबेरनामांश इव स्वयंभुवः।

४) देव महतीयं कथा।

५) सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।

**प्र.३. टिप्पणीद्वयं लिखत।** **(१२)**

१) बाणकृतपूर्वजवर्णनम्।

२) बाणस्य लेखनशैली।

३) कुमारपालितस्याक्षेपः।

**प्र.४. योग्यशब्दानां चयनं कृत्वा पुनर्लिखत।** **(०६)**

१) नमामि---- चरणाम्बुजद्वयम्।(गुरोः, साधेः, भर्त्सोः)

२) तस्य विदिशाभिधाना------राजधानी आसीत्। (नगरी, पुरी, मुखरी)

३) सः------ वयसि उवास। (प्रथमे, बाल्ये, शैशवे)

४) शशिनीव स्फटिक ------ विन्यस्तवामपद्मम्। (चरणपीठे, पादपीठे, मणिपीठे)

५) वैशम्पायनः प्रतीहार्या--- राजन्तिकमाजम्। (धृतपञ्जरः, विहितपञ्जरः, गृहीतपञ्जरः)

६) श्रुता भवद्भिः अस्य ------ स्पष्टता वर्णोच्चारणे। (खगस्य, विहङ्गमस्य, पक्षिणः)

----------